हरेः कल्याणकृद्विष्णुयशाः शुद्धेन चेतसा ॥
सामर्ग्यजुर्व्विद्भिरग्रैस्तन्नामकरणे रतः ।
तदा रामः कृपो व्यासो द्रौणिर्भिक्षुः शरीरिणः ॥
समायाता हरिं द्रष्टुं बालकत्वमुपागतम् ।
तानागतान् समालोक्य चतुरः सूर्य्यसन्निभान् ।
हृष्टरोमा द्विजवरः पूजां चक्रे स ईश्वरान् ॥
पूजितास्ते स्वासनेषु संविष्टाः स्वसुखाश्रयाः ।
हरिं क्रोड़गतं तस्य ददृशुः सत्त्वमूर्त्तयः ॥
तं बालकं नराकारं विष्णुं नत्वा मुनीश्वराः ।
कल्किं कल्कविनाशार्थमाविर्भूतं विदुर्ब्बुधाः ।
नामाकुर्व्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम् ॥
कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसाः ।
ततः स ववृधे तत्र सुमत्या परिपालितः ॥
कालेनाल्पेन कंसारिः शुक्लपक्षे यथा शशी ।
कल्केर्ज्ज्यैष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः ॥
तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः ।
कल्केरंशाः पुरो जाताः साधवो धर्म्मतत्पराः ॥
गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रताः ।
विशाखयूपभूपालपालितास्तापवर्ज्जिताः ।
ब्राह्मणाः कल्किमालोक्य परां प्रीतिमुपागताः ॥
ततो विष्णुयशाः पुत्त्रं धीरं सर्व्वगुणाकरम् ।
कल्किं कमलपत्त्राक्षं प्रोवाच पठनादृतम् ।
तात ते ब्रह्मसंस्कारं यज्ञसूत्रमनुत्तमम् ।
सावित्त्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि ॥
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्कि-जन्मोपनयनम् २ अध्यायः ॥

कल्की, [न्] पुं, (कल्कः पापं नाशतया अस्ति अस्य । कल्क + इनि ।) कल्किः । भगवतो दशावतारेषु चरमोऽवतारः । यथा पुराणे ।
"मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश" ॥
(अस्य जन्मादिविवरणन्तु कल्किशब्दे द्रष्टव्यम् ॥)

कल्पः, पुं, (कल्प्यते विधीयते असौ । कृप् + कर्म्मणि घञ् ।) विधिः । (यथा मनुः ३ । १४७ ।
"एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः" ॥
(कल्पयति सृष्टिं नाशं वा अत्र । कृप् + णिच् + अधिकरणे अप् ।) प्रलयः ।
("युगानां सप्ततिः सैकामन्वन्तरमिहोच्यते" ।
"कृताब्दसंख्यस्तस्यान्ते सन्धिः प्रोक्तो जलप्लवः" ॥
"ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश ।
कृतप्रमाणकल्पादौ सन्धिः पञ्चदशस्मृतः" ॥
ते एकसप्ततियुगरूपा मनवः स्वायम्भुवाद्याः ससन्धयः स्वस्वसन्धिसहिताः कल्पकाले ज्ञातव्याः । ससन्धिदृक्चतुर्द्दशमनुभिः कल्पो भवेदित्यर्थः । इति सूर्य्यसिद्धान्तोक्तकल्पपरिमाणम् ॥ आकालिकनैमित्तिकदैनन्दिनमहाप्रलयानां विवृतिस्तु तत्तच्छब्दे द्रष्टव्यम् ॥ * ॥

कल्प्यते स्वक्रियायै समर्थो भवत्यत्र । कृप् + अधिकरणे घञ् ।) ब्राह्मं दिनम् । तत्तु दैवद्विसहस्रयुगम् । इत्यमरः । १ । ४ । २१ ॥ (यथा विष्णुपुराणे १ मांशे १ । १२ ।
"कल्पान् कल्पविकल्पांश्च चतुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपञ्च युगधर्म्मांश्च कृत्स्नशः" ॥)
त्रिंशत्कल्पैर्ब्रह्मण एको मासो भवति तेषां नामानि यथा । श्वेतवाराहः १ नीललोहितः २ वामदेवः ३ गाथान्तरः ४ रौरवः ५ प्राणः ६ बृहत्कल्पः ७ कन्दर्पः ८ सत्यः ९ ईशानः १० ध्यानः ११ सारस्वतः १२ उदानः १३ गरुड़ः १४ कौर्म्मः १५ अयं ब्रह्मणः पौर्णमासी । नारसिंहः १६ समाधिः १७ आग्नेयः १८ विष्णुजः १९ सौरः २० सोमकल्पः २१ भावनः २२ सुप्तमाली २३ वैकुण्ठः २४ आर्च्चिषः २५ वल्मीकल्पः २६ वैराजः २७ गौरीकल्पः २८ माहेश्वरः २९ पितृकल्पः ३० अयं ब्रह्मणोऽमावास्या । इति ब्रह्मसन्दर्भे प्रभासखण्डम् ॥ एतादृशैर्द्वादशमासैर्ब्रह्मणः सम्वत्सरो भवति । एवं वर्षशतं ब्रह्मण आयुः । तत्र पञ्चाशद्वर्षाणि व्यतीतानि एकपञ्चाशदारम्भे अधुना श्वेतवाराहकल्पः । इति महाभारतम् ॥ (कल्पारम्भकालश्च ब्रह्मसिद्धान्ते उक्तस्तद्यथा,—
"चत्रसितादेर्भानोर्वर्षर्त्तुमासयुगकल्पाः ।
सृष्ट्यादौ लङ्कायामिह प्रवृत्ता दिनैर्वत्स !" ॥
चैत्रसितादेश्चैत्रशुक्लप्रतिपदमारभ्य इत्यर्थः ।
तथा च ब्रह्मपुराणम् ।
"चैत्रे मासि जगत् ब्रह्मा ससर्ज्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ।
प्रवर्त्तयामास तदा कालस्य गणनामपि" ॥
इति कालसामान्यगणनायास्तदारभ्य कथनात् ॥
एवं चैत्रशुक्लप्रतिपदि कल्पारम्भेऽपि ।
"माघशुक्लतृतीयायां कृष्णायां फाल्गुनस्य च ।
पञ्चमी चैत्रमासाद्या यथैवाद्या तथा परा ।
शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी ।
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ।
कल्पनामादयो ह्येता दत्तस्याक्षयकारकाः" ॥
इति वराहवाक्यानि समूलानि चेत् तदा कल्पभेदादविरुद्धानि कल्पादित्वेन तत्तत् तिथिषु श्राद्धकर्त्तव्यतोपयोगिपारिभाषिकपरत्वेन वा समर्थनीयानि ॥ अत एव सूर्य्यसिद्धान्ते उक्तम् । यथा—
"सुरासुराणामन्योन्यमहोरात्रविपर्य्ययात् ।
यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात् ॥
मन्वन्तरव्यवस्था चै प्राजापत्यमुदाहृतम् ।
न तत्र द्युनिशोर्भेदो ब्राह्मकल्पः प्रकीर्त्तितः" ॥
इत्यादीनां युगमन्वन्तरकल्पानां सौरत्वेन उक्तिः । सौरमाणे च नियतयुगादिकालेषु अनियततिथिसम्भवेऽपि सर्व्वेषां कल्पानामादौ चैत्रसितादितिथिरेव नियता प्रागुक्तवचनप्रामाण्यात् । किन्तु प्रागुक्तमात्स्ये ब्राह्मकल्पानां चान्द्रत्वकथनात् तिथिभेदसम्भवः । इति सूर्य्यसिद्धान्तवाक्यं ग्रहस्पष्टीकरणोपयोगीत्यविरोधः ॥) विकल्पः । कल्पवृक्षः । न्यायः । शास्त्रविशेषः । स तु वेदषड़ङ्गान्तर्गतो यागक्रियाणामुपदेशकः । इति हेमचन्द्रः ॥ (यथा रघुः १ । ९४ ।
"कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्" ॥)
व्याकरणस्य प्रत्ययविशेषः । स च स्याद्यन्तत्याद्यन्तपदाभ्यामीषदूनार्थे भवति । तत्र वाच्यलिङ्गत्वे यथा, ईषदूनो विद्वान् विद्वत्कल्पः । ईषदूनं पचति पचतिकल्पम् । इति मुग्धबोधव्याकरणम् । (तथा महाभारते १ । १२६ । ५ ।
"ते परस्परमामन्त्र्य देवकल्पा महर्षयः" ॥)

कल्पकः, पुं, (कल्पयति चौरकर्म्मादिना वेशादिकं रचयतीति । कृप् + णिच् + ण्वुल् ।) नापितः । इति शब्दमाला ॥ कर्च्चूरः । इति भावप्रकाशः ॥ (कल्पयति गद्यपद्यादिकमुद्भाव्य रचयतीति वाक्ये-रचयिता । ग्रन्थकर्त्ता ॥)

कल्पनं, क्ली, (कृप् + भावे ल्युट् ।) कृप्तिः । छेदनम् । इति त्रिकाण्डशेषः ॥

कल्पना, स्त्री, (कृप् + णिच् + भावे युच् टाप् ।) हस्तिसज्जना । नायकस्यारोहणार्थं गजसज्जीकरणम् । इत्यमरः । २ । ८ । ४२ ॥ अनुमितिः । इति न्यायशास्त्रम् ॥ रचना । यथा "प्रबन्धकल्पना कथा" । इत्यमरः । १ । ६ । ६ ॥

कल्पनी, स्त्री, (कल्पयति केशादीन् छिनत्ति अनया । कृप् छेदने + करणे ल्युट् । ततो ङीप् ।) कर्त्तनी । इति हेमचन्द्रः ॥ काँचि इति भाषा ॥

कल्पपादपः, पुं, (कल्पयति सर्व्वकामं सम्पादयति । इति कल्पः । स चासौ पादपश्चेति कर्म्मधारयः ।) कल्पवृक्षः । यथा नैषधे । १ । १५ । "त्वया न चक्रेऽल्पितकल्पपादपः" ॥

कल्पपादपदान, क्ली (कल्पपादपस्य सुवर्णनिर्मितपादपाकृतेर्दानम् ॥ महादानविशेषः । तद्विधानं यथा,
"कल्पपादपदानाख्यमतः परमनुत्तमम् ।
महादानं प्रवक्ष्यामि सर्व्वपातकनाशनम् ॥
पुण्यन्दिनमथासाद्य तुलापुरुषदानवत् ।
पुण्याहवाचनं कृत्वा लोकेशावाहनन्तथा ॥
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ।
काञ्चनं कारयेद्वृक्षं नानाफलसमन्वितम् ॥
नानाविहगवस्त्राणि भूषणानि च कारयेत् ।
शक्तितस्त्रिपलादूर्द्धमासहस्रात् प्रकल्पयेत् ॥
अर्द्धकृप्तं सुवर्णस्य कारयेत् कल्पपादपम् ।
गुड़प्रस्थोपरिष्टाच्च सितवस्त्रयुगावृतम्" ॥
अर्द्धकृप्तं यावदुपात्तसुवर्णस्यार्द्धेन निर्मितम् ।
"ब्रह्मविष्णुशिवोपेतं पञ्चशाखं सभास्करम् ।
कामदेवमधस्ताच्च सकलत्रं प्रकल्पयेत् ॥
सन्तानं पूर्व्वतस्तद्वत्तुरीयांशेन कल्पयेत् ।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्द्धं घृतोपरि" ॥
सन्तानं पूर्व्वतस्तद्वदिति गुड़प्रस्थस्थं सितवस्त्रयुगावृतमित्यर्थः । कामदेवमधस्ताच्चेति सन्तानवृक्षस्याधस्तात् सकलत्रं कामदेवं प्रकल्पयेदिति योजनम् । मन्दारादिष्वेकैकदेवतासम्बन्धश्रुतेः ॥
"पश्चिमे पारिभद्रन्तु सावित्र्या सह जीरके ।
सुरभीसंयुतं तद्वत्तिलेष हरिचन्दनम् ॥
तृतीयांशेन कुर्व्वीत सौम्येन फलसंयुतम् ।
कौषेयवस्त्रसंयुक्तानिक्षुमाल्यफलान्वितान्" ॥
तृतीयांशेनसन्तानघटनावस्थितसुवर्णतृतीयभागेन । सौम्येन उत्तरदिग्विभागेन ॥